# चतुर्थोऽध्यायः

# 1. धनुर्वेदसंहितायाः समीक्षणम्

# 1.धनुर्वेदसंहितायाः समीक्षणम्

वेदानां उपवेदाः निर्धारिताः सन्ति। तत्र शुक्लयजुर्वेदस्य उपवेदः धनुर्वेदः वर्तते। अत्र धनुः शब्दे धिञ् +उस् धातोः निष्पन्नः भवति। वेदशब्दस्य अर्थः दानम् भवति। अनेन धनुष्य विषयकं ज्ञानम् यस्मात् जायते तदैव धनुर्वेदः भवति। धनूर्षि सम्प्रति धनुर्वेदविषयकं विवेचनं अग्निपुराणस्य अध्याय 247 तः 250 मध्ये प्राप्यते। तत्र अस्यानां धनुर्विद्या वर्तते। किन्तु धनुर्वेद संहिता महर्षिवशिष्ठस्य कृतिः वर्तते। अस्मिन् पुस्तके वशिष्ठ–विश्वामित्रयोः संवादः वर्तते।

धनुर्वेदः प्राधान्येन यजुर्वेदसम्बद्धः अस्ति। अस्य सम्प्रति मूलरूपं नैवोपलभ्यते। गोरक्षापीठधीशेन परममहर्षिणा नरहरिनाथेन एको धनुर्वेदनामको ग्रन्थः प्रकाशितोऽस्माकपि दृष्टिगोचरोभूतः किन्तु स नितान्तमेवार्वाचीनः प्रतीयते। भाषादृष्ट्या, श्लोकबद्धोऽयं लघुकायग्रन्थः अस्ति। धनुर्वेदस्य चतस्र एव शाखा व्याप्नोति संक्षेपेण। धनुर्वेदस्य हि चत्वारः पादाः दीक्षा–शास्त्रादिज्ञान शस्त्राभ्यास देवार्चनाभिधाः। तत्र दीक्षापादे धनुषस्तदधिकारिणश्च लक्षणं कृतमस्ति। धनुर्वै आयुधैः मुक्तामुक्त –मुक्ताकयन्त्रमुक्तेति भेदः चतुष्टात्मको यत्र मुक्तश्चादिश्मुक्तः खड्गादिः मुक्तामुक्त+ श्लयादि यन्त्र मुक्तश्च शरादिः।

ते च नारायणपशुपतब्राह्मवैष्णवपार्वतवारुणाग्ने यमेद्य प्रभुतिभेदादनेक– विधः। द्वितीयपादे शस्त्रास्त्रापिविज्ञानम् तृतीयपादे शस्त्राणां ग्रहणमभ्यासः सिद्धिश्च। चतुर्थपदे प्रयोगविधिश्च। श्रूयते हि वशिष्ठ–विश्वामित्र–जामदग्न्य–वैशाम्पायन–गौतम–भारद्वाज–प्रभूतिभिर्मुनिभिः अपि धनुर्वेदमधि –कृत्यानेके ग्रन्थाः प्रणीता इति। किन्तु ते कालकवलिताः सञ्जाता।

कौरवाचार्येण द्रोणेन धनुषप्रदीपाख्यो ग्रन्थो जामदग्न्येन परशुरामेण धनुश्चन्द्रोदयनामको ग्रन्थञ्च प्रणीत आसीत्। परशुरामेऽष्टोत्तरशतप्रकरणा –नयासलिखिता। किन्तु तेऽपि

कालवशात्स्मृतिपथमेव गता इति नास्त्यधुना कश्चिदपि धनुर्वेद –विषयक' प्रामाणिको ग्रन्थः इति परमखेदावहम्।

यद्यपि धनुर्वेदोऽयं लुप्तप्रयोधुना तथापि ग्रन्थान्तरेषु अस्योद्धरणैस्य अस्तित्वं ज्ञायते। महाभारतादिग्रन्थेषु अस्य महत्वपूर्णवर्णनमुपलभ्यते। अस्मद् धन्यतया तादृशा गौरवशालिनी ग्रन्थाः सर्वङ्कसस्य काकस्योदशेदर्यां विलिना इति सुमृशं विषीदतिमनः। धनुर्वेदविषयका ग्रन्थाः अद्यत्वेऽपि समुपलभ्यन्ते इत्यनुश्रूयते परं नाद्यावधि दृष्टिपथ›तः। विदुषां प्रवरैरत्र भूयस्तरमन्वेषणं विधेयम्।

अस्मिन् भारतवर्षे लिखित–साक्ष्याधारोः इतिहासः ऋग्वेदे एव प्राप्यते। ऋग्वेदे समग्रवैदिकवांगमयेषु च अनेकाः प्रजापतयः तासां संवर्धना–पतन–युद्धानि–शाश्वतमूल्यानि–संस्काराः प्रणकिकानां मध्ये संघर्षस्य प्रत्यक्ष–परोक्षश्चालेखानि संस्काराः वर्णितानि। वैदिकालैव न तत्पश्चातकालेऽपि परस्परराज्याणां मध्ये संघर्षस्येतिप्रदेशश्च सम्पूर्णार्यावर्तः युद्धानां च संघर्षानां परम्पराणां यथा रङ्गभूमि अस्तीतिः।[1]

अतः ऋग्वेदेऽर्थववेदे च युद्धं ममसत्यम्। इति कथ्यते। राज्ञे दिग्वजयमयिवार्यमस्ति। यज्ञसंस्थायाः भागरूपेण अश्वमेघ, राजसूययज्ञादयः यज्ञाः अस्य समर्थनं करोति। पुरातनेकाले राज्ञे चक्रवर्तीपदस्य प्राप्तिः आदर्शरूपेण प्रस्थापितम्। सेन कारणेन युद्धम् राज्ञः जीवनेऽनन्तर›भाग इत संस्थितम्।

वेदेषु ते प्रत्येकवेदस्योपवेदस्य तेषां यजुर्वेदस्योपवेदः धनुर्वेदोऽस्ति। यजुर्वेदस्य केन्द्रस्थानेऽस्ति यशसंस्था अर्थात् कर्मकाण्डः। अन्यं च सकलवेदवा›मयस्य द्वयेनभागेन विभाजितम् यथा ज्ञानकाण्डः च कर्मकाण्डः च। येन कर्मकाण्डेन ज्ञानकाण्डेन निःश्रेयसमोक्षप्राप्तिः भवतीति। येन कर्मकाण्डः च कर्मकाण्डः च। ज्ञानकाण्डेन भौतिकानि सुखानि संपत्तिश्च स्वर्गस्य प्राप्तिः भवेच्च। अतः धनुर्वेदः यया शस्त्रास्त्रविधया उपदेशिता तयाविधया अस्य प्रकारस्य सुख–संपत्ति प्राप्त्याधारो भवति।

येन धनुर्वेदे ज्ञानेन युद्धानामयोजनं तेषां निर्णयाः व्यूहरचना–सैन्यरचना –शस्त्ररचना ज्ञानेन शत्रोपरि विजयं प्राप्त्वा ऐश्वर्यवानभवितुं अर्हति। एवं च स्वरक्षणायापि अस्य ज्ञानस्यावश्यकतास्ति।

अतः प्राच्यकाले प्रायः सर्वेषु देशेषु अस्य विद्यायाः प्रचारोऽभवत्। भारतवर्षेऽपि अस्या विद्यायाः अतीव विस्तृता गुरुपरम्परा भविता यय विद्यया क्षत्रियकुमाराः अभ्यासपूर्वकेन पठन्ति स्म। अद्यतने प्रायः ये ग्रन्थाः लुप्तप्रायाः सन्ति। कतिपय ग्रन्थेषु अस्य ज्ञानस्य संक्षिप्तेन वर्णनं प्राप्नोति। यथा शुक्रनीतिः, कामान्दकीय, नीतिसार, अग्निपुराण, वीरचिन्तमणि, वृद्धशार्ङ्धरः, युक्तिकल्पतरु, नीतिमयूख्यादिग्रन्थेषु च ।

कतिपयग्रन्थाः केवलंधुर्नवेदविषयकं स्वीकृताः सन्ति। यथा –

1. औशनस धनुर्वेदः।
2. कौदण्डमण्डनम्।
3. बृहत्शार्ङ्धरपद्धतिः।
4. वशिष्ठस्य धनुर्वेदसंहिता
5. पौरस्त्य धनुर्वेदः। इत्यादयाः

**धनुर्वेदसंहितायाः आरम्भः –**

महर्षिवशिष्ठकृत धनुर्वेदसंहितायाः प्रारम्भोः गद्यमयोऽस्ति। अथ मङ्गलाशब्देन सह संहितायाः प्रारम्भो भवति। यजुर्वेदार्थवेदसम्मतां सरहस्यो धनुर्विद्या प्रोवाच परशुरामाय भूतभावनो भगवान सदाशिव! प्रोक्ता च सैव कालान्तरे ब्रह्मर्षिप्रवरेण वशिष्ठेन राजर्षिप्रवराय विश्वामित्राय यथातथ्येति नाविदितिमस्तिविदितवेदितव्यानां विदुषाम्।

अस्मिन् गद्यखण्डे विश्वामित्राय विजिगीषु च राजर्षि विशेषणाभ्यां विभूषयति। यत् विश्वमित्रं समर्थराजारूपेण सूचयति। आचार्येण कौटिल्येन सह सहमतमस्तिर्यथा–

अरिविजिग्रीष्वो भूर्म्यनन्तरं ––––।
अरिविजिगीषुमध्यानां बहिः––––।
विजित्रीषुमित्रं मित्रमित्रं –––––।[1]

प्रस्तुतग्रन्थे प्रावीणस्य हेतवः स्पष्टरूपेण प्रदर्शिताः।

1. दुष्टशत्रुविनाशनम्।
2. स्वरक्षणाय।
3. दुष्टदस्युचौरादिभ्यः गोब्राह्ममणसाधेवेदसंरक्षणाय।
4. प्रजापालनम्।[2]

धनुर्धरस्य सामर्थ्यं कीदृशमस्ति तस्य विषये महर्षिणा उक्तं च –

एकोऽपि यत्र नगरे प्रसिद्धः स्याद्धानुर्धरः।
ततो यान्त्यश्यो दूरान्मृगा सिंहगृहादि व।।[3]

**गुरुशिष्ययोः अधिकारित्वम् :–**

अस्य विद्यायाः प्रणेता भगवान् शिवः इति। शिष्यपरम्परां क्रमेण परशुराम–वशिष्ठ–विश्वामित्रश्च ये चतुर्थाः क्रमशः –

एको देवाधिदेवः महादेवः।

द्वितीयो साक्षान्नारायणावतारोः परशुरामः।

तृतीयो प्रचण्डसत्वतपबल सम्पन्नो ब्रह्मज्ञानीश्च। ब्रह्मपुत्रोश्च ब्रह्मषिश्च ऋषिवशिष्ठः इति।

चतुर्थो स्वसामर्थ्येन ब्रह्मर्षिपदप्राप्तो राजर्षि विजिगिषु विश्वामित्रः गुरु कति शस्त्राणि चालयितुं समर्थः येनाधारेण गुरुणां भेदाः प्रकीर्तिता। यथा –

**आचार्यः –** आचार्यः सप्तयुद्धः इति कथ्यते। अर्थात् सप्तप्रकारस्यशस्त्राणां युद्धानां ज्ञाता इति। सप्तयुधानि चक्र–कुन्त–खडग–छुरिका–गदा–धनुष– बाहु इत्यादयाः।

**भार्गव**ः – कोऽपि चत्वारेषु शस्त्रेषु प्रवीणः स्यात। भार्गवः चत्वारायुधाधारित –युद्धेषु ज्ञाता इति भार्गवः।

**योधः –** अस्त्रद्वयेषु निपुणो तर्हि योधः।

**गणकः** – एकेनायुधेन कुशलतापूर्वकेन योधकम् तर्हि गणकः इति। [4]

**शिष्यः –** धनुर्वेदपरम्परायां शिष्यो धीमान्, मेधावी, प्रचण्ड बुद्धिमान, दृढ़चेता, दृढमनोबलयुक्तः, स्थिर, ज्ञानी, उच्चकुलेषु जातीयश्च। शिष्ये लोभः धूर्तता, अपरिपक्वता, मन्दबुद्धि, इत्यादयाः अवगुणाः न भवेत्।[5]

**युद्धे हन्तव्याहन्तव्यस्य नियमाः –** अर्थात् केन सह योधव्यम् केन सह न योधव्यम् इति। युद्धे कस्य वधं करणीयम् ? कस्य वधं न करणीयम् ? इत्यादि वर्णनमत्र प्राप्यते।

**वर्णानुसारेण अस्त्रशस्त्राणां वर्गीकरणम्** :– परम्परागतसमाजस्य कर्मानुसारेण विभगचत्वारेषु चतुर्वर्णेषु वर्गीकरणं प्राप्यते। युद्धस्य संभावस्य कारणद्वयमस्ति। आक्रमणं संरक्षणात्मकम् च। वस्तुतः सकलसमाजस्य स्वसंरक्षणाय च राष्ट्रहिताय च धनुर्विद्यायाः ज्ञानमवाश्यकमस्ति। अतः प्राच्यकाले शस्त्रज्ञानं प्रत्येकवर्णस्य क्षमतानुसारेण चावश्यकतानुसारेण पाठ्यतीति मन्यते।[6] यथा–

ब्राह्मणाय धनुर्वेदेयं खडगं वै क्षत्रियाय च।
वैश्याय यापयेत् कुन्तं गदां शूद्राय यापयेत्।।[7]

तदानुसारेण –

1. ब्राह्मणाय धनुः।
2. क्षत्रियाया खडगम्।
3. वैश्याय कुन्तम्।
4. शूद्राय गदाम् ।

एवं क्रमेण शस्त्रान स्वीकृत्य वर्णानुसारेण शिक्षयेत।

**महर्षिवशिष्ठकृत संहितयो सैन्यव्यस्था :–**

**हेतुः** –वस्तुतः सैन्यम् समर्थ–वीर, साहसिक, विशालः, शत्रूणां भयोत्मनकर्तारमादि गुणानां युक्तं भवेत्। अस्योल्लेखाः वैदिकसाहित्येषु प्राप्यते। यथा यजुर्वेदे कथितं यत् – समर्थसैन्यं यत् अस्ति येन प्रभावेण मित्राणि समीपे आगच्छन्ति च एवं च शत्रवः दूरे गच्छन्ति।[8]

**नृपः –** सैन्यस्य मुख्यनेतारूपेण अवस्थितः नृपेणनिवार्यतया सम्पूर्णधनु–विद्याया च रणनीतिज्ञज्ञनस्य प्राप्तं करणीयम्। व्याकरणे लकारेषु मुख्यरूपेण आज्ञार्थ लकारस्य ज्ञानमावश्यकम् अस्ति। येन सैनिकानां कूच–आक्रमणादि आदेशः सम्यकतया दातुं समर्था भवेत्। [9]

**सेनापतिः** – सैन्यनायको शक्तिशाली, बलवान, ज्ञानी, क्षत्रियवर्णस्य भवेदीति। सम्पूर्णधनुर्वेदे व्याकरण–क्षात्रकोश–मनुस्मृति–मिताक्षरा–

विष्णुयमल, विज्यख्या स्वशास्त्रादीनि शास्त्राणि तानि सेनानायकेन ज्ञातव्यानि।[10]

**पदाति –** पदाति चतुरंगिणीसेनायाः एतत् महत्वपूर्णम›मस्ति। इत्युक्ते विना वाहनेन विना प्राणिना केवलेन पदेन सैनिकानां समूहः तत्र सैनिकाः समाच्याः न ह्रस्वमानाः कूर्दने–धावने ये वै समास्ते कार्यसाधकाः स्थिरीकरणं, शयनं, धावनं, पश्चादगमनं परसेनायां प्रवासादीनि कार्याणि कर्तुं समर्थाः भवेच्च।[11]

**अश्वदलम् :–** अश्वान युद्धे उपयुज्य विभिन्नप्रकारेषु गतिषु शिक्षितं करणीयम्। यथा– वर्तलाकारः, चतुष्कः, अर्धचन्द्राकारः, सर्पाकरः, आदयाः।[12]

हस्तिदलम् – गजदले गजान् पर्वतारोहण जलमग्न, धावन, कूर्दन, उपवेशन इत्यादि कार्येषु गजान शिक्षयेत्। [13]

रथः – रथे अश्वानां योजयित्वा अश्वेन सह रथः समतलभम्यां धावनादिषु कार्येषु शिक्षयेत्। [14]

यजुर्वेदस्योपवेदो धनुर्वेदोऽयं पादचतुष्टयप्रणिबद्धः विश्वामित्रादिमहर्षिभिः संग्रन्थित इति निर्दिष्टपूर्वम्। तत्र दीक्षापादनाम्नि प्रथमे पादे धनुर्लक्षणम् धनुषोऽधिकारिणां लक्षणाञ्च निरूपितम्। अत्र धनुः शब्दः चतुर्विधायुधपरः। ते च आयुधाश्चतुर्विद्याः मुक्तकः अमुक्तकः, मुक्तामुक्तकः यन्त्रमुक्तभेदात्। तत्रापि –

मुक्तकश्चक्रादिः।

अमुक्तः खडगादिः ।

मुक्तामुक्तश्च शल्यादिः।

यन्त्रमुक्तश्च शरादिः।

पुनरपि तं आयुधा ब्राह्म–वैष्णव–पाशुपतप्रजापत्य –आग्नेय भेदादनेकविधाः।

द्वितीयपादे अस्त्रशस्त्रादिविज्ञानम्।

तृतीये च पुनः गुरुविशेषसाम्प्रदायिक शस्त्रादिविवरणम् तेषामभ्यासः, सिद्धिकरणञ्च सम्यक प्रतिपादितम्।

चतुर्थाऽधाये तु देवार्चनाऽभ्यासादि सिद्धिः अस्त्रशस्त्रादि प्रयोगश्च प्रदशितः।

श्रीमद्भागवतद्रोणाचार्यागुरुपादैः प्रणीतो धनुष्यप्रदीपाख्यः सप्तसहस्र–श्लोकसम्मितो ग्रन्थोऽनुश्रूयते। एवमेव धनुषचन्द्रोदयनामको ग्रन्थः

षष्टिसहस्र श्लोकैः प्रणिबद्धो वित्रवंशावतंसै श्रीपरशुरामदाभागैः प्रणिबद्धोऽन्यः सन्दर्भः।

अत्र हि शब्दशकत्या मन्त्रशक्त्या च शस्त्राशस्त्रं संचालनविषयो दर्शिताः। अष्टोत्तरशतप्रकरणगुम्फितो अयं ग्रन्थः सातिशयमहत्वपूर्णः। अत्र हि भृशुण्डिः, कुलिशः? यादृशः, चामर, शक्ति, ब्रह्मास्त्र, रुद्रास्त्र, पाशनिर्माण, पाशमोचन, अग्निवर्ष, जलवर्ष, ज्वरप्रयोग, औषधप्रयोग, प्रभूति दिव्यमायुध नामशेषविशेषवर्णनपुरस्परं वर्णनमुपन्यस्तम्। परन्त्विदानीं कालवशादस्माकम् धन्यतया वा सपेऽप्यमी धनुर्वेदग्रन्थाः हन्त। लोप›ताः इति सुभृशं दुनोति। अस्य ग्रन्थस्य विषये यदा समीक्षा क्रियते तदा एते आधारस्तम्भाः भवन्ति। ते चे ––

1. धनुर्दानविषयः।
2. कतियुद्धाामि भवन्ति।
3. आचार्यलक्षणम्।
4. धनुष्प्रमाणाम्।
5. निषिद्ध धनुः।
6. प्रत्य×चा लक्षणानि।
7. शरक क्षणामि।
8. शतघ्नीनां वर्णनम्।
9. शरार्णः विवेचनम्।

**धनुर्दानविषयः** –

आचार्येण धनुर्देयं ब्राह्मणेन परीक्षिते।
शठे धूर्त्रे कृतघ्ने च मन्दबुधे न दीयते।।

ब्राह्मणाय धनुदेयं ब्राह्मणेन वै क्षत्रियाय च।
वैश्याय दापयेत् कुन्तं गदां शूद्रयदापयेत।

आचार्यः शुभे मुर्हूते धनर्विद्यायाः शिक्षां दधात्। ग्रन्थेऽस्मिन् अन्ये च ज्योतिषशास्त्रानुसारेण शुभमुर्हूतस्योल्लेखोऽस्ति। शुभमुर्हूते दानहोमाभ्यां देवान् सन्तर्प्य ब्राह्मणान कुमारीश्च भोजयित्वा वस्त्रालंकारभूषणैरन्नपानादिभिश्चाचार्य पूजयित्वा कृतोपवासः धृताजिन–

परिग्रहः बद्धाञ्जलिपुटः शिष्यः आचार्यं धनुः याचयेत्। आचार्यः वेदविधानतः मन्त्राभिमन्त्रिंत धनुः शिष्याय दधात् शिष्यः तद्धनु गृहीत्वा वेधत्रयं कुर्यात्।[15]

**कतियुद्धाामि भवन्ति :–**

धनुष्चक्रतु कुन्तञ्च खड्गरिकां गदाम्।
सप्तमं बाहुयुद्धं स्यादेवं युद्धानि सप्तधा।।

**धनुर्युद्धम् –**

एतत् युद्धं द्वैरथयुद्धरूपेऽपि कथ्यते। रामायणे राम–रावणयोः युद्धम्। लक्ष्मण–इन्द्रजीतयोयुद्धम्। महाभारते अर्जुनकर्णयो युद्धम्। पितामह–भीष्मार्जुनयोः युद्धमादि।[16]

**चक्रयुद्धम् –**

चक्रात् युद्धं यथा महाभारते घटोत्कच–कर्णयोः द्वन्द्वयुद्धे चक्रयुद्धं वर्णनमस्ति।

क्षुरान्तं बालसूर्यामं मणिरत्नविभूषितम्।
चिक्षेपाधिरथेः कुद्धो भैमसेनिर्जिधंसया।।[17]

तत्र घटोत्कचकर्णयोः युद्धे चक्रायुद्धस्योल्लेखः प्राप्यते। यथा –

आयसानि च चक्राणि भुशुण्डयः शक्तितोमराः।
पतन्त्यविरलाः शूलाः शतधन्यः पट्टिशास्तधा।।[18]

**कुन्तयुद्धम् –**

महाभारते कुन्तयुद्धे विशारदो धर्मराजः युधिष्ठरोऽभवत्। द्वयोः योद्धयोः मध्ये कुन्तेन द्वारा युद्धं करोतीति।

**खड्गयुद्धम् –**

महाभारते धृष्टद्युम्नद्रोणयोः युद्धे द्रोणसमक्षं धृष्टद्युम्नेन खडगयुद्धस्य विविधान् प्रवराश्चैक विंशति मार्गन् दर्शयामास यथा –

भ्रान्तं–उदभ्रान्तम् –आविद्धम–आप्लुतं –प्रसृतं सृतम्।
परिवृत्तं निवृत्तं च खडगं चर्म च धारयन्।।
सम्पातं समुदोर्णं च दर्शयामास पार्षतः।
भारतं कौशिकं चैव सात्वतं चैव शिक्षया।।[19]

महाभारते सहदेवनकुलौ खडगयुद्धे कुशलौ इति। यथा –

तथाति पुरुषानन्यान् त्सारुकौ कुशलौ यमजावुभौ।[20]

**गदायुद्धम् –**

भीमदुर्योधनौ गदायुद्धे विशारदौ यथा –

दोणस्य तु तदा शिष्यौ गदाग्यौ बभूवतुः।
दुर्योधनश्च भीमश्च सदा संशब्दमानसौ।।[21]

महाभारते गदायुद्धवर्णनं यथा –

उपन्यस्तमपन्यस्ते गदायुद्धविशारदौ।
एवं तौ विचरन्तौ तु परस्परमविध्यताम्।।[22]

**बाहुयुद्धम् –**

बाहुयुद्धं विनाशस्त्रस्त्राभ्यां हस्तसहायेन कृतम् युद्धम्। महाभारते भमजरासंधयोः मध्ये एतत्युद्धं भवति स्म।[23] एतं युद्धं मल्लयुद्धरूपेणामपि ज्ञायते। एवं सप्तयुद्धानि सन्ति।

**आचार्यलक्षणम् :–**

आचार्यः सप्तयुद्धैः स्यात्वचतुर्भिर्भागवस्तथा।
द्वाभ्याञ्चैव भ्वेद्योद्धा एकेन गणको भवेत्।।

**धनुष्प्रमाणाम् :–**

प्रथमं पौरुशं चापं युद्धचापं द्वितीयकम्।
निजबाहुबलोन्मानं किञ्चदूनं शुभं भवेत्।।

**निषिद्ध धनुः–**

अति जीर्णमयं च शति धृष्टन्तथैव च।
दग्धं छिन्नं न कर्तव्यं बाह्याभ्यन्तरहस्तकम्।।
गुणहीनं गुणाक्रान्तं काण्डदोषसमान्वितम्।
गलग्रन्थि तलग्रन्थि न कर्तव्यं सदा बुधैः।।

**प्रत्यञ्चा लक्षणानि** –

गुणानां लक्षणं वक्ष्ये यादृशं कारयेद् गणम्।
धनुः प्रमाणं निः सन्धि कार्यस्त्रिगुणतन्तुभिः।।
वर्तितं स्याद्गुणः सूक्ष्मः सर्वकार्यमहो युधिः।
पट्टसूत्रैः गुणः कार्यः कनिष्ठामनससम्मितः।।

**शरलक्षणानि :–**

शरणश्च त्रिविधः ज्ञेयाः स्त्री पुमांश्च नपुंसकः।
अग्रे स्थूलो भवेन्नारी पश्चात्स्थेलको भवेत्युमान्।।
समं नपुंसकं ज्ञेयं तल्लक्ष्यायं प्रशस्यते।

दूरपातं यवतया च पुरुषो भेदभद् दृढम्।।

**शतघ्नीनां वर्णनम् :–**

सर्वलोहास्तु ये बाणा नाराचास्ते प्रकीर्तिताः।
पञ्चाभिः पृथुकै पक्षैर्युक्ता सिद्धयन्ति कस्यचित्।।
मालिका लघवो बाणा नलयन्त्रेण चोहिताः।
अत्युच्चदूरपातेषु दुर्गयुद्धेषु ते मताः।।

**शरार्णः विवेचनम् :–**

आरामुखं क्षुरप्रञ्च गोपुच्छं चार्द्धाचन्द्रकम्।
सूचीमुखच्च भल्ल वत्सदन्तं सुवल्लभम्।।
आरामुखेनैव चर्म्म क्षुरत्रेण च कार्मुकम्।
शुचीमुखेन कवचमर्धचन्द्रक मस्तकम्।।
भल्लेन हृदयं वेध्यं द्विभल्लेन तथैव च।
लौहञ्च काकतुण्डेन लक्ष्यं गोपुच्केन च।

**प्रशिक्षण व्यवस्था :–**

वैदिककालदारभ्य चापबाणौ शस्त्रेषु उच्चस्थाने स्तः। गदा, खडग, परशु, आदि शस्त्राणां प्रशिक्षणमावश्यकममस्ति। तथापि धनुर्बाणस्य प्रशिक्षणं संहितायां केन्द्रस्थाने अस्ति। तदनुसारेण संहितायां केन्द्रभागे धनुबाणस्यैव वर्णनं प्राप्नोति।

संहितायां प्रथमं दीक्षा–दीक्षायाः कर्माणिः तदा तत्काले किं कर्तव्यम्? दीक्षायाः कर्मणिः निर्णयादि विषयान् चर्चितानि।

चापानि, बाणस्य, नापम, तस्य लक्षणानि निषिद्धानि चापानि, चापस्य प्रकाराः, प्रत्यंचा बाणानि, बाणस्य गुणाः, बाणस्याग्रभागः, बाणस्यप्राकराः, बाणत्यक्तकाले धनुर्धरधरित स्थानानि इत्यादि विस्तृतेन प्रदर्शितानि।

अन्यानि विषयान् संग्रहे एवं सिद्धप्रयोगे च वर्णितानि। तानि सर्वाणि विषयानि अद्यत्वेऽपि प्रशिक्षणार्थी सरलरीत्या ज्ञापितुं शक्नोति। अन्यं च अस्त्रवर्णितवर्णानुसारेण संग्रहालयेषु सङ्गहितचापबाणस्य तस्य नामतः अभिज्ञायते। तत्र संहितायां वर्णितवर्णनानि एवं च तदनुसारेण तानि विषयानि सचित्रं दर्शयितुं शक्यते।

धनुर्वेदे भेदनाय विभिन्नप्रकारस्य लक्ष्यानि सन्ति। येन कारणेन धनुर्धरेण व्यावहारिकभूमिकायां युद्धे परिस्थित्यानुसारेण युद्धाय सञ्जातः। तदनुसारेण लक्ष्याणि चतुर्थानि सन्ति। यथा –

1. स्थिरम् – तेषां लक्ष्यं च धनुर्धरो स्थिरं भवति।
2. चलम् – तेषां लक्ष्यं चलं भवति च धनुर्धरोऽचलो भवति।
3. चलाचलम् – तेषां लक्ष्यं स्थिरं कृत्वा धनुर्धरो चलितो भूत्वा लक्ष्यभेदनं करोति।
4. चलाचलम् – तेषां लक्ष्यधनर्धरो चलं भवति।[24]

युद्धविद्यायां विभिन्नप्रकारस्य प्रशिक्षितेषु योगविद्या तत्र विशेषेण प्राणायामतिमहत्वपूर्णमस्ति। अतः श्रमक्रियां पूरक–रेचक–कुम्भकादीनां प्राणस्य आयमानां वर्णनं कृतम्।[25]

अत्र गुरु–शिष्य द्वयोः धनुर्ज्ञानस्याभ्यासस्य ध्येयमषि स्वयं कृतम्। यथा

आचार्य हेतोः शिष्याय सर्वोत्तम प्रशिक्षणं दात्व्यामिति ध्येयम्।

भार्गवस्ये हेतोः सुदूरेण स्थितलक्ष्य भेदनाय राज्ञः हेतोः दृढ़पदार्थस्य भेदनाय, अन्य हेतोः लक्ष्यभेदनाय।[26]

तत्र हेतु अनुसारेण चत्वारः सिद्धान्ताः महर्षिणा स्थापिताः। तद्यथा –

1. श्रमः –अभ्यासाय परिश्रमः।
2. अस्खलितदृष्टिः – स्थिरदृष्टिः, एकाग्रता सूचयति।
3. प्राणायामः ' पूरकादिप्रणानां नियमनम्।
4. गुरुसमक्षं श्रमक्रिया –कुशलेन गुरुणा द्वारा प्रशिक्षतम्।[27]

महर्षिवशिष्ठानुसारेण धनुर्धरो यदा पुष्पवदकोमलतायै बाणञ्च चाप–प्रत्यञ्चचा च सर्पवदकठोरतायै गृहणाति तदा धनुर्ज्ञानस्य कौशल्यं सिद्धहस्तं भवति।[28]

युद्धारम्भे व्यूहरचनायाः ज्ञानम् महर्षिणा कथ्यते– युद्धकारणेन युद्धाङ्गने नृपस्योपस्थिति आवश्यकमस्ति। नृपेण स्वस्य पुरतः सामन्ताः मित्र नृपाः राजपुत्राः सत्यवादी, शूरवीर, विश्वासु, योद्धाः स्थापनीया।[29]

युद्धकाले समर्थबलवन्तञ्चसेनानायको सेनाग्रे स्थापयित्वा सैन्यस्य चतुरङ्गाणि क्रमबद्धरूपेण स्थापयेत। शत्रुबलं विचिन्त्य दण्ड–वाराह–शकट– मत्स्य–मकर पद्मादिव्यूहानि रचनीयम्।[30]

धनुर्वेदस्यारम्भ्यास्ये ज्ञायते हि एषो ग्रन्थो युद्धविद्यायां अन्यानि त्यक्त्वा धनुर्बाणस्य प्रकार, लक्षण, हेतु, युद्धानि, पदानि, प्रयोगादिसा›ोपा›वर्णनं करोति। युद्धशास्त्रस्यानुसन्धानाय अन्यं च धातुविद्या, ज्योतिष, पातंज्जलयोग, आयुर्वेद, कर्मकाण्ड, व्याकरण, स्मृति , वेद, इतिहासादीनि अन्यानि शास्त्राण्यापि आवश्यकतानुसारेण चर्चितानि सन्ति।

# सन्दर्भ–सूची


1. कौटिल्यार्थशास्त्रे – 6/2/3,6,1
2. धनुर्वेदे – प्रास्ताविक–गद्यखण्डे
3. धनुर्वेदे – 1/6
4. धनुर्वेदे – आचार्य लक्षणम् , श्लोक–10
5. धनुर्वेदे – श्लोक–7
6. धनुर्वेदे –श्लोक –8
7. धनुर्वेदे –श्लोक –8
8. ऋग्वेदे – 7/5/24, 30,2,34,19
9. धनुर्वेदे– सेनाधिकरणविधिः – श्लोक 54–55 पदीतिक्रमः
10. धनुर्वेदे–सेनाधिकरणविधिः
11. धनुर्वेदे–सेनाधिकरणविधिः 54–55
12. धनुर्वेदे – अश्वक्रम–श्लोक–63
13. धनुर्वेदे – हस्तिक्रम,
14. धनुर्वेदे –हस्तिक्रमः
15. एभिर्धिनैश्च शिष्याय गुरुः शस्त्राणि दापयेत्।
    सन्तर्प्यदान होमाभ्यां सुरान् शास्त्रविधानतः।
    शिष्याय मानुषं चायं धनुर्वेदाभिमन्त्रितम्।
    काण्डात्काण्डेति मन्त्रेण दधाभेदविधानतः।। शि.धनु.1/14–15
16. दृष्टव्य – महाभारते भीष्म–कर्णपर्वणि
17. महाभारते – द्रोणपर्व–115/39
18. महाभारते – द्रोणपर्व–115/46
19. महाभारते – द्रोणपर्व–91/38,39
20. महाभारते–अदिपर्वे – 131/62,
    असि कर्मणौ निष्णातौ चमौ सत्वतो वरौ। महा.आदि–131/62
21. महाभारत – आदि. –131/60
22. महाभारत–शल्य.–57/19–20
23. महाभारत–सभा – 22/23 अध्याये

24. धनुर्वेदे – अथ लक्ष्यम् – श्लोक – 95–98

**25.** धनुर्वेदे –अथ लक्ष्यम– श्लोक–21–22
**26.** धनुर्वेदे –अथ श्रमक्रिया, श्लोक – 25
**27.** धनुर्वेद – अथ लक्ष्यम् – श्लोक – 99–100
**28.** धनुर्वेदे –अथ श्रमक्रिया, श्लोक – 24
**29.** धनुर्वेदे –श्रमक्रिया, श्लोक – 42–43
**30.** धनुर्वेदे – अथ व्यूहादि– श्लोक– 47–49